**षोडशः पाठः**

# ब्रह्मवादिनी मैत्रेयी

**प्राचीनकालादेव स्त्रीणाम् आदरः लोके विद्यते। वैदिककाले उपनिषत्काले च तासाम् अध्ययनस्य उत्तमा व्यवस्था आसीदेव। उपनिषत्काले स्त्रीशिक्षायाः महत्त्वम् अधिकम् आसीत्। ताः वेदाध्ययनम् अपि कुर्वन्ति स्म। तासाम् उपनयनसंस्कारः अपि भवति स्म। मध्ययुगे परकीयाक्रमणैः तासां स्थितिः शोचनीयतां गता। स्त्रीशिक्षायाः मार्गः अवरुद्धः अभवत्। परन्तु प्राचीनकाले तासां स्थितिः उत्तमा आसीत्। नार्यः न केवलं पठन्ति स्म अपितु पाठयन्ति स्म। मैत्रेयी न केवलं शिक्षिता तपस्विनी स्त्री अपितु प्रसिद्धा अध्यापिका ब्रह्मवादिनी चासीत्। उपनिषत्काले तस्याः महती प्रतिष्ठा आसीत्। बृहदारण्यकोपनिषदि ब्रह्मवादिन्याः मैत्रेय्याः विद्वत्तायाः विस्तरेण वर्णनमस्ति। तामेव सङ्क्षेपेण प्रस्तौति पाठोऽयम्।**

भारतीयसमाजे नारी सदैव सम्मानार्हा पूज्या च अस्ति। अत एवोक्तम् -

*यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।*
*यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥*

यत्र नारीणाम् आदरः भवति तत्र देवताः स्वयं निवसन्ति। परं यत्र ताः अपमानिताः भवन्ति तत्र सर्वाणि कार्याणि विफलानि भवन्ति।

भारते वैदिककाले उपनिषत्काले च नारी शिक्षिता आसीत्। सा न केवलम् अध्ययनम् अपितु सूक्तरचनाः अपि करोति स्म। वैदिककाले अपाला, घोषा, विश्ववारा, मैत्रेयी एतादृश्यः ब्रह्मवादिन्यः आसन्। उपनिषत्काले ताः जीवनविषयकं जगद्विषयकञ्च ज्ञानम् अधिगन्तुम् इच्छन्ति स्म। उपनिषत्काले वेदाध्ययनस्य कृते तासाम् उपनयनसंस्कारः अपि क्रियते स्म। ''पुरा कल्पे तु नारीणां मौञ्जीबन्धनमिष्यते'' इत्यनेन स्मृतिवचनेन तद् ज्ञायते।

याज्ञवल्क्यस्य भार्याद्वयम् आसीत्। कात्यायनी मैत्रेयी च। कात्यायनी गृहकर्मकुशला आश्रमव्यवस्थां पश्यति स्म। मैत्रेयी आध्यात्मिकरुचिसम्पन्ना वेदाध्ययनं शास्त्रचर्चां च कुर्वती आसीत्। महाराजजनकः तस्याः पाण्डित्यम् अध्यापनकौशलं ज्ञात्वा सीताम् अध्यापयितुं तां नियोजितवान्। मैत्रेयी सीतायै वेदानां संस्काराणाम् इन्द्रियनिग्रहस्य च ज्ञानं दत्तवती। एतादृशेण अध्यापनेन दृढसंस्कारैः च सीता स्वजीवने सङ्कटकाले अपि न विचलिता अभवत्।

एकदा याज्ञवल्क्यः मैत्रेयीं कात्यायनीं च आहूतवान् तथा उक्तवान् - ''अद्य अहं गृहस्थाश्रमं त्यक्त्वा संन्यासाश्रमं स्वीकरोमि। मम गमनादनन्तरं युवयोर्मध्ये कलहः मा भवतु। अतः सम्पत्तिविभाजनं कृत्वा एव गच्छामि'' इति। पत्युः निर्णयं श्रुत्वा मैत्रेयी चिन्तामग्ना अभवत्। यदि मम सर्वाधारः पतिः संन्यासं स्वीकरोति तर्हि एतेन नश्वरेण धनेन किम् ? इति विचिन्त्य सा उक्तवती - ''भगवन् अनेन ऐश्वर्येण युक्तां पृथिवीं प्राप्य अहम् अमृता भविष्यामि वा ?'' नहि। ''धनेन धनिकः मनुष्यः यथा जीवनं सुखेनैव यापयति तथैव भवत्याः अपि जीवनं सुखमयं भवेत्। परम् एतेन धनेन अमृतत्वं न प्राप्यते'' इति याज्ञवल्क्यः उक्तवान्।

तत् श्रुत्वा मैत्रेयी अवदत् – ''यदि वित्तेन नाहम् अमृता भविष्यामि तर्हि धनं स्वीकृत्य किं करोमि ? यत् अमृतत्वस्य साधनम् अस्ति तद् वदतु भवान् ।''

स्वपत्न्या: ब्रह्मजिज्ञासां ज्ञात्वा याज्ञवल्क्य: आत्मनिरूपणम् आरब्धवान् –''मैत्रेयि ! पत्न्या: कृते पति: प्रिय: भवति, पुत्र: प्रिय: भवति । परं सा पुत्रस्य कृते पत्यु: कृते वा प्रिया न भवति, अपितु आत्मन: कृते प्रिया भवति । तथैव धनं प्रियं भवति, देवा: प्रिया: भवन्ति । परं सर्वम् आत्मन: कृते एव । यस्मिन् आत्मनि वयं स्निह्याम: स: एक: एव । अयं ब्राह्मण:, अयं क्षत्रिय: इति एतेषां शरीराणि भिन्नानि परन्तु तेषु शरीरेषु सर्वेषु आत्मा एक एव । य: सर्वाणि भूतानि आत्मन: भिन्नानि पश्यति स: मुक्तिं प्राप्तुं न शक्नोति । सर्वेषु शरीरेषु एक: एव आत्मा इति य: जानाति स: मुक्तिं प्राप्नोति । अयम् आत्मा एव अखिलस्य विश्वस्य आधार: इति । 'कथम्' इति तं मैत्रेयी अपृच्छत् ।

याज्ञवल्क्य: उदाहरणेन स्पष्टं कृतवान् – ''यथा सर्वस्य जलस्य समुद्र: एव आधार: । समुद्रात् निर्मितं जलं पुन: समुद्रे एव विलीनं भवति । तथैव ब्रह्मतत्त्वात् निर्मितं विश्वं तत्रैव विलीनं भवति । इदं ब्रह्मतत्त्वं सम्पूर्णविश्वे व्याप्तम् अस्ति । यथा शर्करा जले सर्वत्र समानरूपेण व्याप्ता भवति तथैव आत्मा अपि अन्तर्बाह्यव्याप्त: । अयमात्मा सर्वेषां देहे तिष्ठति । देह: नश्वर: । यदा स: देहे तिष्ठति तदा तस्य भिन्नानि नामानि सन्ति । देहनाशादनन्तरम् आत्मा देहात् बहि: निर्गच्छति, तदा तस्य कापि संज्ञा नास्ति । स: न नश्यति । तत्र विकारा: अपि न भवन्ति । एकमेव अद्वितीयं परब्रह्म । यदा तस्य ज्ञानं भवति तदा सर्वं विदितं भवति । अमृतत्वं च प्राप्यते ।

अस्य अमृतत्वस्य साधनं किम् ? इति मैत्रेयी अपृच्छत् । तदा याज्ञवल्क्य: उक्तवान् – आत्मसाक्षात्कार: एव अमृतत्वस्य साधनम् । इति ब्रह्मनिरूपणं कृत्वा याज्ञवल्क्य: संन्यासं स्वीकृतवान् । एवं ब्रह्मवादिनी मैत्रेयी याज्ञवल्क्यात् ब्रह्मज्ञानं प्राप्तवती ।

नास्ति कुत्रचित् एतादृशी ब्रह्मवादिनी स्त्री: या धनं विहाय ब्रह्मज्ञानम् इच्छति । अत:मैत्रेयी भारतीयसंस्कृतौ आदर्शभूता ।

## शब्दार्थ:

सम्मानार्हा – सम्मान के योग्य (स्त्री) । रमन्ते – आनन्दित होते हैं । सूक्तरचना: – वैदिक सूक्तों की रचना । एतादृश्य: – इस प्रकार की । ब्रह्मवादिन्य: – ब्रह्मतत्त्वकी जानकारी रखने वाली/अध्यापन कराने वाली । अधिगन्तुम् – जानने के लिए । मौञ्जीबन्धनम् – मूंज की घास का बना कटि सूत्र पहनना/यज्ञोपवीत संस्कार । भार्याद्वयम् – दो पत्नियाँ । पाण्डित्यम् – ज्ञान को । अध्यापयितुम् – पढ़ाने के लिए । इन्द्रियनिग्रहस्य – इन्द्रियों के संयम का । आहूतवान् – बुलाया । गमनादनन्तरम् – जाने के बाद । युवयोर्मध्ये – तुम दोनों के बीच । पत्यु: – पति का । सर्वाधार: – सम्पूर्ण आधार । विचिन्त्य – सोचकर । अमृता – जन्म-मृत्यु के बन्धन से रहित (स्त्री.) । यापयति – बिताता है । आत्मन: – स्वयं का । आत्मनि – आत्मा में । भिन्नानि – अलग-अलग हैं । भूतानि – प्राणी । अखिलस्य – सम्पूर्ण का । ब्रह्मतत्त्वात् – ब्रह्मतत्त्व से । शर्करा – शक्कर । अन्तर्बाह्यव्याप्त: – अन्दर और बाहर/शरीर व संसार में प्याप्त । नश्वर: – नाशवान् । संज्ञा – नाम । विकारा: – दोष । विदितम् – ज्ञात । आत्मसाक्षात्कार: – स्वयं की जानकारी/स्वयं को जानना । ब्रह्मनिरूपणम् – ब्रह्म का निरूपण । विहाय – छोड़कर ।

## अभ्यास:

1. **एकपदेन उत्तरं लिखत –**

(क) भारतीयसमाजे का सदैव पूज्या अस्ति ?

(ख) मैत्रेयी कस्य पत्नी आसीत् ?

(ग) जनक: सीताम् अध्यापयितुं कां नियोजितवान् ?

(घ) आश्रमव्यवस्थां का पश्यति स्म ?

(ङ) सर्वस्य जलस्य आधार: क: ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) देवता: कुत्र रमन्ते ?

(ख) मैत्रेयी सीतायै केषां ज्ञानं दत्तवती ?

(ग) धनेन किं न प्राप्यते ?

(घ) अमृतत्वस्य साधनं किम् ?

(ङ) क: मुक्तिं प्राप्तुं न शक्नोति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) देवता: कुत्र रमन्ते ? कुत्र न रमन्ते ?

(ख) उपनिषत्काले भारते नारीणां दशा कीदृशी आसीत् ?

(ग) याज्ञवल्क्य: मैत्रेयीं कात्यायनीं च आहूय किम् उक्तवान् ?

4. **प्रदत्तशब्दै: रिक्तस्थानानि पूरयत –**

(अद्वितीयं, आत्मा, मैत्रेयी, अमृतत्वस्य, वेदाध्ययनं)

(क) सर्वेषु शरीरेषु .................... एक एव।

(ख) मैत्रेयी ............................ कुर्वती आसीत्।

(ग) एकमेव ........................ परब्रह्म ।

(घ) याज्ञवल्क्यात् ...................... ब्रह्मज्ञानं प्राप्तवती।

(ङ) आत्मसाक्षात्कार: एव ........................ साधनम्।

5. **शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत –**

(क) आत्मा एव अखिलविश्वस्य आधार: अस्ति। ☐

(ख) धनेन अमृतत्वं प्राप्यते। ☐

(ग) वैदिककाले नारी शिक्षिता आसीत्। ☐

(घ) उपनिषत्काले नारीणाम् उपनयनसंस्कार: अपि क्रियते स्म। ☐

(ङ) कात्यायनी सीतायै ज्ञानं दत्तवती। ☐

6. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – संस्कारैः | संस्कार | तृतीया | बहुवचनम् |
| (क) समुद्रे | | | |
| (ख) सर्वस्य | | | |
| (ग) एतेषाम् | | | |
| (घ) पत्युः | | | |

7. **अधोलिखितशब्दानां धातुं लकारं च लिखत –**

| शब्दः | धातुः | लकारः |
|---|---|---|
| यथा –भवति | भू (भव्) | लट्लकारः |
| (क) ज्ञायते | | |
| (ख) तिष्ठति | | |
| (ग) पश्यति | | |
| (घ) शक्नोति | | |

8. **अधोलिखितशब्दानां धातुं प्रत्ययञ्च पृथक् कुरुत –**

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| यथा –ज्ञात्वा | ज्ञा | क्त्वा |
| (क) अधिगन्तुम् | | |
| (ख) कृतवान् | | |
| (ग) विचिन्त्य | | |
| (घ) त्यक्त्वा | | |

9. **अधोलिखितशब्दानां पर्यायशब्दान् लिखत –**

यथा –नारीणाम् स्त्रीणाम्

(क) सङ्कटकाले

(ख) उपनयनसंस्कारः

(ग) समुद्रे

(घ) पतिः

10. **अव्ययैः वाक्यनिर्माणं कुरुत -**

यथा -यदा - तदा    <u>यदा</u> रामः पठति <u>तदा</u> कृष्णः पठति ।

(क) कृते

(ख) एव

(ग) बहिः

(घ) यत्र

## योग्यताविस्तारः -

- वैदिककाले याः अन्याः ब्रह्मवादिन्यः आसन् तासां विषये अन्विष्य पठत ।
- वैदिककाले नारीणां दशा भारतवर्षे कीदृशी आसीत् लिखत ।